संस्कृत वार्ता:

दिनाङ्क :- 05.11.2026 **प्रात:** - 06:55

अथवार्ताः

केन्द्रीयमन्त्रिमण्डलम् - अग्निवीराणां सेवाविस्तारः

केन्द्रीयमन्त्रिमण्डलेन अग्निवीराणां सेवायां द्विवर्षात्मकः विस्तारः अनुमोदितः। एते अग्निवीराः पूर्वं चतुर्वर्षीयसेवानन्तरं सेवामुक्ताः भवितुम् आसन्। ह्यः नवदिल्ल्यां केन्द्रीयमन्त्रिमण्डलस्य उपवेशनानन्तरं रक्षाप्रमुखः जनरल् एन. एस्. राजा सुब्रमणिः उक्तवान् यत् येषां पञ्चसप्ततिप्रतिशतम् अग्निवीराणां सेवामुक्तिः भवितुम् आसीत्, तेभ्यः अधुना अतिरिक्तद्विवर्षीयसेवायाः अवसरः प्रदास्यते। ततः परं निरन्तरं सेवां कर्तुम् इच्छन्तः अग्निवीराः सशस्त्रसेनासु प्रवेशं प्राप्तुं शक्नुवन्ति।

जनरल् राजा सुब्रमणिः उक्तवान् यत् अस्याः योजनायाः अन्तर्गतं पञ्चसप्ततिप्रतिशतं अग्निवीरेभ्यः अतिरिक्तद्विवर्षीयसेवावधिः प्रदास्यते। अनेन सेवाविस्तारेण सह अधिकं वेतनम् अपि प्रदास्यते इति सः अवदत्। केन्द्रीयमन्त्रिमण्डलेन भारतस्य स्वच्छोर्जाकार्यक्रमम् अधिकं सुदृढं कर्तुं द्विनवति-गिगावाट्-मिता प्रतिहोरा-परिमितक्षमतायुक्ता ऊर्जा-सञ्चययोजना अपि अनुमोदिता। तदतिरिक्तं, मन्त्रिमण्डलेन शीघ्रविचारणार्थं विशेषन्यायालयानां केन्द्रप्रायोजितयोजना आगामिपञ्चवर्षाणि यावत् निरन्तरतायै अनुमोदिता। अस्यां योजनायाम् अनन्य-पॉक्सो-न्यायालयाः अपि सम्मिलिताः।

अमितशाहः - हरियाणाप्रवासः

केन्द्रीयगृहमन्त्री अमितशाहः अद्य अम्बाला-छावनी-स्थले शहीदस्मारकस्य उद्घाटनं करिष्यति। एतत् स्मारकं सप्तपञ्चाशदधिक-अष्टादश-शततमे वर्षे सम्पन्नस्य प्रथमस्वातन्त्र्यसङ्ग्रामस्य वीरहुतात्मनां स्मृतौ निर्मितम् अस्ति। भाजपानेता पूर्वमन्त्री च असीमगोयलः ह्यः अम्बालानगरे आयोजिते वार्तासम्मेलने एतां सूचनां दत्तवान्।

उत्तरप्रदेशः - परीक्षाः

उत्तरप्रदेश-माध्यमिक-शिक्षापरिषदा आगामिवर्षस्य दशमकक्षायाः द्वादशकक्षायाश्च परीक्षाणां कृते उत्तरपत्रिकाणां नूतनं प्रारूपं प्रवर्तयितुं निर्णयः कृतः। नूतनव्यवस्थानुसारम् उत्तरपत्रिकाणां कृते एकमेव

मुख्यावरणं भविष्यति, यस्मिन् QR इति सङ्केतः अङ्कितः भविष्यति। सङ्केतस्य अवलोकनेन उत्तरप्रदेश-माध्यमिक-शिक्षापरिषदः चिह्नं दृश्यते। परिषदा दशमकक्षायाः द्वादशकक्षायाश्च उत्तरपत्रिकाणां कृते भिन्नवर्णानां प्रयोगः कर्तुम् अपि निर्णयः कृतः।

प्रधानमन्त्री - एशियापैरा-क्रीडाः

प्रधानमन्त्री नरेन्द्रमोदी अद्य नवदिल्ल्याः इन्दिरागान्धी-क्रीडाप्राङ्गणे ऐषमः एशिया-पैरा-क्रीडासु भागं गृहीतवद्भिः भारतीयदलस्य सदस्यैः सह संवादं करिष्यति। अस्मिन्नवसरे असौ समुपस्थितान् जनान् अपि सम्बोधयिष्यति। जापानदेशस्य आइची-नागोया-नगरे आयोजितासु एशिया-पैरा-क्रीडासु भारतं स्वस्य अद्यावधि श्रेष्ठतमं प्रदर्शनम् अकरोत्। भारतस्य सप्तनवति-पैरा-क्रीडकाः आहत्य चतुर्दशाधिकैक-शतपदकानि विजितवन्तः। एतेषु त्रिंशत्-स्वर्णपदकानि, पञ्चत्रिंशत्-रजतपदकानि, नवचत्वारिंशत्-कांस्यपदकानि च सम्मिलितानि सन्ति।

हॉकी-क्रीडा

हॉकी-क्रीडायां, हयः मोहाली-नगरे पुरुषाणां एशियन्-चैम्पियन्शिप्-ट्रॉफी इत्यस्याः क्रीडायाः उपान्त्यचक्रे भारतेन दक्षिणकोरियादलं पराजित्य निर्णायकचक्रे स्थानं प्राप्तम्। अधुना अद्य उपाध्यर्थं भविष्यमाणे अन्तिमे चक्रे भारतस्य जापानदलेन सह स्पर्धा भविष्यति।

पुरुषाणां क्रिकेट्-क्रीडा

पुरुषाणां क्रिकेट्-क्रीडायां, वृष्ट्या प्रभावितायां प्रथमायाम् एकदिवसीय-अन्ताराष्ट्रियस्पर्धायां भारतेन न्यूज़ीलैण्ड्-दलं पञ्चस्तोभैः पराजितम्। एषा स्पर्धा ऑकलैण्ड्-नगरे अभवत्।

॥**इति वार्ताः**॥